वर्षम् - ०१ अङ्कः - ०१
जनवरी-दिसम्बर, २०१९

शोधज्योतिः
ISSN-2350-0700

# काव्यभेदाः

**डा. यस्. वि. बी. के. गुप्ता***

आनन्दवर्धनाचार्यात् प्राक् सर्वेऽपि आलङ्कारिकाः काव्यबाह्यस्वरूपाधारेण काव्यभेदान् अभणन्। प्रप्रथमं भामहः काव्यरचनाभेदरूपेण दृश्यकाव्यम्, श्रव्यकाव्यमिति द्विधा व्यभजत्। दृश्यकाव्ये नाटकादिकं, श्रव्यकाव्ये काव्यादिकं च वर्तते। श्रव्यकाव्यस्य भेदत्रयं वर्तते। गद्यकाव्यं पद्यकाव्यं चम्पूकाव्यमिति। पद्यकाव्यं तु महाकाव्यखण्डकाव्यादिभेदेन बहुधा भिद्यते।

भाषाभेदरूपेण संस्कृतं, प्राकृतं, अपभ्रंशम् इति काव्यं त्रिविधम्। वस्तुभेदरूपेण वृत्तदेवादिचरितशंसि, उत्पाद्यवस्तु, कलाश्रयं, शास्त्राश्रयम् इति काव्यं चतुर्विधम्[१]। निर्माणभेदरूपेण सर्गबन्धं महाकाव्यम्, अभिनयार्थम्, आख्यायिका, कथा, अनिबद्धम् (मुक्तकम्) इति पञ्चविधम्[२]

भामहानन्तरमागताः सर्वेऽप्यालङ्कारिका भामहमन्वसरन्। आनन्दवर्धनस्य **“काव्यस्यात्मा ध्वनिः”** इति सिद्धान्तकरणानन्तरम् उपरि उक्तैः विभजनैस्सह अन्यत् काव्यभेदविभजनं समागतम्। आनन्दवर्धनाचार्यमतेन काव्यार्थप्रतीतेरुपयोगितः शब्दस्य वाच्यलक्ष्यार्थयोः न प्राधान्यं शरीररूपत्वात्। किन्तु सहृदयश्लाघ्योत्कर्षमात्रत्वेन परापेक्षया चमत्करातिशयाधानात् च आत्मभूतः प्रतीयमानः योऽर्थः स एव काव्यत्वव्यपदेशहेतुः प्रधानतमः।

ध्वनिवादमते काव्यं त्रेधा विभज्यते। ध्वन्यालोके व्यङ्ग्यार्थस्य प्राधान्ये ध्वनिसंज्ञितः काव्यप्रकारः, तस्य गुणीभावे तु गुणीभूतव्यङ्ग्यम्, केवलवाच्यवाचक-वैचित्र्यमात्राशयेनोपनिबद्धमालेख्यप्रख्यं यदा भासते तच्चित्रं काव्यम्। न तन्मुख्यं काव्यं काव्यानुकारो हि सः[३]। तदनु ध्वनिसिद्धान्तसमर्थकाः सर्वेऽपि आलङ्कारिका मम्मटादय एतं विभागम् अङ्गग्यकुर्वन्। एतेषां विविधानां काव्यभेदानां लक्षणानि मम्मटाचार्येण काव्यप्रकाशे एवम् अभिहितानि।

---

* संस्कृतप्राध्यापकः

[१] दशरूपकम् - १

[२] दशरूपकम् - १

[३] ध्वन्यालोकः - १९४

## उत्तमकाव्यलक्षणम्

**"इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद् ध्वनिर्बुधैः कथितः"**[४]। इति।

**निश्शेषच्युतचन्दनं स्तनतटं निर्मृष्टरागोऽधरो**
**नेत्रे दूरमनञ्जने पुलकिता तन्वीतवेयं तनुः।**
**मिथ्यावादिनि दूति बान्धवजनस्याज्ञात पीडागमे**
**वापीं स्नातुमितो गताऽसि न पुनस्तस्याधमस्यान्तिकम्**[५]॥

विश्वनाथोऽपि एवं बभाण-

**"वाच्यातिशयिनि व्यङ्ग्ये ध्वनिस्तत् काव्यमुत्तमम्"**[६]।

इति उत्तमकाव्यस्यापि भेदत्रयं वर्तते। रसध्वनिः, अलङ्कारध्वनिः, वस्तुध्वनिश्चेति। तत्र रसध्वनिः सर्वोत्तमः।

## मध्यमकाव्यस्य लक्षणम्

**"अतादृशि गुणीभूतं व्यङ्ग्यं व्यङ्ग्ये तु मध्यमम्"**[७]।

**ग्रामतरुणं तरुण्या नववञ्जुलमञ्जरीसनाथकरम्।**
**पश्यन्त्या भवति मुहुर्नितरां मलिना मुखच्छाया**[८]॥

अत्र व्यङ्ग्यार्थस्य सत्त्वेऽपि वाच्यार्थापेक्षया तस्य गौणत्वं भवति। व्यङ्ग्यस्य वाच्यात् अनतिशयश्च न्यूनत्वेन तुल्यत्वेन इति द्विविधः।

## अधमकाव्यलक्षणम्

**"शब्दचित्रं वाच्यचित्रमव्यङ्ग्यं त्ववरं स्मृतम्"**[९]।

---

[४] काव्यप्रकाशः – १.४

[५] काव्यप्रकाशः – १.२

[६] साहित्यदर्पणः – ४.१

[७] काव्यप्रकशः – १.५

[८] काव्यप्रकाशः – १.३

[९] काव्यप्रकाशः – १.६

**स्वच्छन्दोच्छलदच्छकच्छकुहरच्छातेतराम्बुच्छटा-**
**मूर्च्छन्मोहमहर्षिहर्षविहितस्नानाह्निकऽह्नाय वः।**
**भिद्यादुद्यदुदारदर्दुरदरीदीर्घादरीद्रद्रुम-**
**द्रोहोद्रेकमहोर्मिमेदुरमदा मन्दाकिनी मन्दताम्॥**[10]

अवरकाव्येऽस्मिन् शब्दचित्रादिकम् अलङ्कारप्रदर्शनादिकं च भवति। अत्र रसाभावादस्याधमत्वम्।

## श्रव्यकाव्यम्

श्रव्यं नाम श्रवणयोग्यम्। श्रोतारम् उद्दिश्य लिख्यमानानि काव्यानि श्रव्यकाव्यानि भवन्ति। उदाहरणम् - रामायणम्, भारतम्, भागवतम्। श्रव्यकाव्येषु नैके भेदाः सन्ति। ते च। १. इतिहासम्, २. पुराणम्, ३. प्रबन्धम्, ४. लघुकृतिः, ५. खण्डकाव्यम्, ६. शतकम्, ७. उदाहरणम्, ८. चाटवः, ९. यक्षगाणानि, १०. दण्डकम्, ११. बिरुदावली, १२. उपाख्यानमित्यादयः। आधुनिके काले कथाः व्यासाः जीवितचरित्राणि स्वीयचरित्राणि च श्रव्यकाव्यस्य भेदत्वेन परिगणिताः भवन्ति।

## दृश्यकाव्यम्

रङ्गस्थलस्योपरि प्रदर्शनयोग्यं द्रष्टुं योग्यं च यद् भवति तत् दृश्यकाव्यम् इत्युच्यते। प्रदर्शनार्थं यदनुकूलं भवति तदेव दृश्यकाव्यं भवति।

| | | | |
|---|---|---|---|
| उदाहरणम् – | कालिदासः | - | अभिज्ञानशाकुन्तलम् |
| | भवभूतिः | - | उत्तररामचरितम् |
| | शूद्रकः | - | मृच्छकटिकम्। |

दृश्यकाव्यं रूपकम् अथवा नाटकम् इति नाम्ना व्यवह्रियते। दृश्यकाव्यं स्थूलतया द्विधा वर्गीकर्तुं शक्यते। तद्यथा - १. रूपकाणि, २. उपरूपकाणि च।

धनञ्जयः दशरूपके रूपकाणि लक्षणभेदेन दशधा विभक्तवान्।

**नाटकं प्रकरणं भाणः प्रहसनं डिमः।**
**व्यायोगसमवकारौ वीथ्यङ्केहामृगा इति**[11]**॥**

## कथावस्तुस्वरूपेण काव्यभेदः

---

[10] काव्यप्रकाशः – १.४

[11] दशरूपकम् – १.८

वस्तु आधारीकृत्य काव्यं त्रिविधम्। तद्यथा –

१. प्रख्यातम् - भारतरामायणादिग्रन्थेषु प्रसिद्धवस्तु युक्तं भवति। उदाहरणार्थं कालिदासस्य आभिज्ञानशाकुन्तलं भारतमाधारीकृत्य निर्मितं वर्तते।

२. उत्पाद्यम् - केवलं कल्पितम् उत्पाद्यं भवति। अस्मिन् कविः स्वयमेव कथाप्रपञ्चं सृजति। उदाहरणं शूद्रकस्य मृच्छकटिकम्।

३. मिश्रम् - प्रसिद्धकथां कविः पुनः स्वकल्पनया इतिवृत्तं मिश्रीकरोति। अर्थात् अत्र किञ्चित् प्रख्यातं किञ्चित् उत्पाद्यञ्च इतिवृत्तञ्च भवति अतः भेदमिदं मिश्रमम् इत्युच्यते।

## उपयुक्तानां ग्रन्थानां सूची

१. काव्यप्रकाशः, मम्मटः, राजस्थान प्रच्यविद्या प्रतिष्ठान, राजस्थानम्, १९५९
२. कुमारसम्भवम्-कालिदासः, चौखम्बासंस्कृतसंस्थानम्, वाराणसी, १९८७
३. जानकीहरणम्, कुमारदास, ओरीयण्टल् पब्लिषिंङ्ग् को., बाम्बे, १९०८
४. दशरूपकम्, धनञ्जयः, निर्णय-सागर प्रेस्, मुंबई, १९१७
५. ध्वन्यालोकः, आनन्दवर्धनः, श्रीकुप्पुस्वामिशास्त्रि रीसेर्च इन्स्टिट्यूट्, मद्रास्, १९४४
६. निरूक्तम्, यास्कः, केन्द्रीयपुस्तकविभागः मुम्बई, १९१८
७. महाभारतम्, व्यासः, वाविल्लरांशास्त्रि सन्स्,चेन्नै, १९३५,
८. रघुवंशः, कालिदासः, चौखम्बा विद्याभवनम्, वारणसी, १९५५
९. साहित्यदर्पणः, विश्वनाथः, भारतीयविद्याप्रकाशनम्, दिल्ली, १९७८
१०. संस्कृतसाहित्येतिहासः, आचार्यलोकमणिः, कृष्णदास अकाडमी, वाराणसी, १९९३
११. संस्कृतसाहित्येतिहासः, सीतारामचतुर्वेदी, चौखम्बा विद्याभवनम, वाराणसी, १९६७